International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(2): 36-38
© 2025 IJMH
www.themultijournal.com
Received: 25-04-2025
Accepted: 28-04-2025
Publish : 30-04-2025

**Dr. PTG Ranga Ramanujacharyulu**
Assistant Professor,
Department of Agama,
National Sanskrit University,
Tirupati

**Correspondence:**
**Dr. PTG Ranga Ramanujacharyulu**
Assistant Professor,
Department of Agama,
National Sanskrit University,
Tirupati

# श्रीभाष्ये आनन्दमयशब्दार्थनिरूपणम्

**Dr. PTG Ranga Ramanujacharyulu**

**श्रीमाधवाङ्घ्रिजलजद्वयनित्यसेवा प्रेमाविलासयपराङ्कुशपादभक्तम्।**
**कामादिदोषहरमात्मपदाश्रितानां रामानुजं यतिपतिं प्रणमामि मूर्ध्ना।।**
**लोके सकलविधप्राणिनां कृते आनन्दः परमप्राप्यभूतवः।**
**आनन्दः परिपूर्णिताभावरूपज्ञानविशेषः।**

**श्रीमद्रामायणे सुन्दरकाण्डे-** एति जीवं तमानन्दं वर्षशतादपि[1] इति सीतीयाः कृते हनुमत् श्रीरामलक्षणयोः कुशलवार्ताकथनावसरे वर्षशतेभ्यः आनन्दानुभावः नूनं भवेदिति इति जानक्या प्रोक्तम्। अयमेवानन्दस्य परमार्थः।

**आनन्दशब्दः टुनादि -** समृद्धौ इति धातोः समुत्पन्नः।

स्वाभीष्टप्रातिप्रकटनपरः निरतिशयानन्द इत्यर्थः। स एवमोक्ष इत्यपि उच्यते।

**छान्दोग्योपनिषदि -** स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीर[2] इति परमात्मसन्निधौ प्राकृतदेहानुभवादीन् परित्यज आहारविहारादीननुभवति।

तथैव स सर्वांश्च लोकनाप्नोति सर्वांश्च कामान् यतस्तमात्मानमनुविद्य विजानाति[3] इत्यादिना जीवात्मनःआनन्दानुभावः विवृतः । परमात्मनः आनन्दविषये अवाप्तसमस्तकामत्वं तेनाचिदचिद्विलक्षण-त्वम् आनन्दमयत्वं च उच्यते। एतावता आन्नशब्दस्य समृद्धिहेतुकपरिपूर्णतात्रयुक्तानुकूल्यभवना-परत्वमुच्यते।

**श्रीमद्रामानुजाचार्यैर्विरचिते शरणागतिगद्यव्याख्यानावसरे-** आनन्दकल्याणशब्दौ स्वपरोक्षया अनुकूल-त्वपरौ इति श्रुतप्रकाशिकाचार्या ऊचुः।

आन्न्दशब्दस्य प्रियः, मोदः, प्रमोदः, आनन्दधुः, सुखं, तुष्टिः, पुष्टिः, सन्तुष्टिः इत्याद्यानेक -पर्यायपदानि विद्यन्ते। आनन्दशब्दस्य

**मुत्प्रीतिः प्रमदो हर्षप्रमोदादामोदसम्मोदाः।**
**स्यादानन्दधुरानन्दशर्मशतसुखानि च।**[4] इत्यमरकोशकथनम्।

जगत्कारणतत्त्वनिर्णयावसरे चार्वाकबौद्धजनार्हतादिनास्तिकदर्शनेषु आनन्दशब्दार्थः पृथक्तया व्याख्या-तः। यथा भौतिकेन्द्रियविषयसुखानन्द इति चार्वाकदर्शने, यावज्जीवं जीवः सुखदुःखमिश्रितं क्लेशमनु-भवतीति तन्नाश एव आनन्द इति बौद्धदर्शने,पारलौकिकसुखानुभवमेव प्राप्यमिति तस्य वेदः प्रामाणिको न भवतीति जैनदर्शने विवृतम्।

आस्तिकदर्शनेषु सांख्ये मूलप्रकृतिः प्रधानम्। जगत्कारणभूतत्वात्तदन्तर्भूतः निर्गुणः जीवः आनन्दा-दिगुणाः कर्तृत्वभोक्तृत्वादिधर्माः प्रकृतेः कारणत्वेन सिध्यन्तीति विवृतम् । सेश्वरसांख्याभिख्ये योग-दर्शने जीवः चित्तविकारेभ्यः तीर्त्वा अष्टाङ्गयोगानुष्ठानेन कैवल्यरूपमोक्षानुभवमा प्नोतीति व्याख्यातम्। दर्शनेऽस्मिन् ईशवरस्य आनन्दस्वरूपप्रदातृत्वादयः नैव विद्यन्ते ।

न्यायवैशेषिकदर्शनयोः आनुमानिकेश्वरः निमित्तकारणत्वेन निरूपितः।

सः सर्वज्ञः सर्वशक्तिमानिनिति च प्रोक्तः।

पाषाणसदृशस्य निर्विकारस्यात्मनः चैतन्यादिगुणाः आगन्तुकाः। तस्यात्यन्तिकदुःखनिवृत्तिरेव मोक्षः।

मोक्षदशायां पूर्वगुणैस्सह ज्ञानस्यापि नष्टत्वात् ज्ञानरूपानन्दोऽपि न सिद्ध्यति। पूर्वमीमांसायां जीवस्य वेदविहितधर्मकर्माचरणे-नोत्पन्न अपूर्व एव स्वर्गादिसुखरूपानन्दं प्रददाति । वेदान्तदर्शने वेदसार-भूतासु उपनिषत्सु तत्त्वदर्शनावसरे दार्शनिकानां प्रमाण-स्वीकारभेदेन सिद्धान्त-भेदाः जाताः। आत्मनः आनन्दमयत्व-कथनावसरे तैत्तिरी-यानन्दवल्ली सविस्तरं प्रत्यपादि।

**बृहदारण्यके -** सा यथा सैन्धवघनो अन्तरोऽबाह्यः कृत्स्नो रसघन एव, एवं वा अरे अयमात्मा[5] इति उदाहृतः। ब्रह्मसूत्राणां कर्ता भगवान् वेदव्यासमहर्षिः आनन्दमयस्य वैशिष्ट्यं षष्ठे आनन्द-मयाधिकरणे आनन्दमयोऽभ्यासात्[6] इत्यस्मिन् सूत्रे न्यरूपि।

आनन्दमयाधिकरणविवरणं भगवद्रामानुजाचार्याः श्रीभाष्ये अत्य-द्भुतरूपेण व्याचिख्यासुः। यथा आनन्दमयाधिकरणे ब्रह्म चिदचि-द्विलक्षणमित्युक्तम्।

श्रीभाष्यकाराः श्रीभाष्यारम्भे ब्रह्मशब्दविषये ब्रह्म शब्देन च स्वभावतो निरस्तनिखिलदोषोऽ -नवधिकातिशयकल्याणगुणगुणः पुरुषोत्तमो अभिधीयते। सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः। बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्योऽर्थः। स च सर्वेश्वर एव इति व्याख्यां चक्रुः।

तेषां परमाचार्याः श्रीमद्यामुनाचार्याः स्तोत्ररत्ने- स्वाभाविकान-वधिकातिशयेशितृत्वं नारायण! त्वयि न मृष्यति वैदिकः कः?[7] इति ब्रह्मशब्दः श्रीमन्नारायणपर एवेति प्रश्नरूपेण प्रतिपादयामासुः।

स एव पुरुषोत्तमः श्रियःपतिः जगदाधारः नारायणः महाविष्णु-रिति स्तोत्ररत्नव्याख्याने विवृतम्। सन्दर्भेऽस्मिन् पुरुषोत्तमशब्दः परमात्मनः समस्तवस्तुविलक्षवैलक्षण्यं स्पष्टं निरूपयति।

यथा अपुरुषः नाम अचेतना प्रकृतिः।

पुरुषः नाम चैतन्यविशिष्टः बद्धचेतनः।

उत्पुरुषः बद्धा -द्विलक्षणः मुक्तचेतनः।

उत्तरपुरुषः नाम मुक्तापेक्षया विलक्षणः नित्यः- अनन्तगरुड-विष्वक्सेनादयः। उत्तमपुरुषः अथवा पुरुषोत्तम इतिचेत् चिदचिद्वि-लक्षणः परमात्मशब्दाभिधेयः इत्यूचुः। स एव सर्वोत्कृष्ट ब्रह्मशब्द-वाच्य इति श्रीभाष्ये भगद्रामानुजाचार्याः व्याख्यां चक्रुः। तैत्तिरीया-नन्दवल्यामादौ अन्नप्राणमयमनोमयकोशान्निरूप्य तदनु तेभ्यः विलक्षणस्य चेतनात्मकस्य विज्ञानमयस्य स्वरूपमुक्त्वा चेतना-चेतनात्मकविलक्षणस्य परमात्मनः आनन्द-मयत्वेन विवृतम्।

आनन्दशब्दविषये प्राचुर्यार्थे मयट् इति मयट् प्रत्ययेनानन्द-मयाशब्दः उत्पद्यते। विज्ञानमयकोशस्य भिन्नतया अन्तर्यामितया शरीरित्वेन च आनन्दमयत्वं विद्यत इत्युक्तम् ।

**श्रीरामानुजाचार्याः शरणागतिगद्ये–** अखिलहेयप्रत्यनीककल्या-णैकतानस्वेतरसमस्तवस्तु-विलक्ष-णानन्तज्ञानानन्दैकस्वरूपः इति भगवतः स्वरूपं विवृतवन्तः। आत्मानुकूलभावनारूपज्ञानविशेषः आनन्दः । तैत्तिरीये सत्यं ज्ञानमनन्तं ब्रह्म[8], ज्ञः कालकालो गुणी सर्ववित् यः[9] इति ज्ञानस्वरुपम् , यः सर्वज्ञः सर्व वित्[10] परास्य शक्तिः विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च[11] इत्यादि श्रुतयः निदनभूताः । रसो वै सः , आनन्दमयः , एषह्येवान्द याति, रसग्ह्येवायं लब्ध्वाऽऽनन्दी भवती इत्यादि श्रुतयः भगवतः आनन्दगुणकत्वं निरुपयन्ति।

**शरणागतिगद्यप्रबन्धे –** अखिलहेयप्रत्यनीककल्याणैकतानस्वेत-रसमस्तवस्तुविलक्षणानन्तज्ञाना- नन्दैकस्वरूपः इत्यस्मिन् वाक्ये ज्ञानानन्दशब्दयोःअनन्याधीनत्वस्वयंप्रकाशकत्वाह्लादकरत्वरूपज्ञा न-मेव यस्य स्वरूपं स ज्ञानानन्दैकस्वरूपः नाम ज्ञानतया आनन्दतया च कात्स्न्येन कल्याणत्व -मियुक्तं भवतीति श्रीकृष्णसूरिमहोदयः व्याख्यानं चकार।

जीवस्यानन्दविषये विज्ञानमयः[12] विज्ञानं यज्ञं तनुते[13] इति विज्ञानरूपेण एवमेव, ज्ञानानन्दैकलक्षणम् , ज्ञानानन्दमयस्यात्मा , निर्वाणमय एवात्मा इत्यादिप्रमाणैः ज्ञानानन्दमयत्वं श्रुतयः निरूपयन्ति।

एवमेव ज्ञानस्य स्वरूपनिरूपणेन सह धर्मगुणभूतकत्वेनापि उच्यते। यथा – विज्ञातार मरे केन विजानीयात्[14],

एष हि द्रष्टा श्रोता रसयिता मन्ता बोद्धा कर्ता विज्ञात पुरुषः [15]इति।

जीब्रह्मणोः आनन्दतारतम्यविषये जीवस्य तु भगवत्संकल्पवशात्, परमात्मनः स्वसंकल्पेनैवेति ग्राह्यम्। यतो हि बद्धावस्थायां जीवस्य कर्मसम्बन्धेनापहतपाप्मत्वाद्यात्मधर्माः विनश्य जन्मादयः प्राकृत धर्माः सम्भवन्ति। अस्यां दशायां भगवदनुग्रहेण परमात्मनः अन्तर्यामित्वम्, तेन ज्ञानविकासः तदा भगवत्प्राप्तिभूतानन्दविकाश्च सञ्जायते।

व्यासमहर्षिः सम्पद्याविर्भावः स्वेन शब्दत्[16] इत्यस्मिन् सूत्रे विषयोऽयं सुस्पष्टं चकार।

**श्रीरामानुजाचार्याः श्रीभाष्ये-** ज्ञानानन्दादिगुणानां कर्मणा आत्मनि सङ्कुचितानां परंज्योतिरुप- सम्पद्य कर्मरूपबन्धक्षये विकासरूपा-विर्भावो नानुपपन्नमिति सुष्ठूक्तम्।

आनन्दमयाधिकरणे आनन्दशब्दवाच्यः परमात्मा एवेति निरूप-यितुं अष्टौ सूत्राणि सन्ति। प्रथमे आनन्दमयोऽभ्यासात् इत्यस्मिन् सूत्रे तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः इत्यारभ्य तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मा आनन्दमयः इत्यादितैत्तिरीय-कवाक्यैः आनन्दमयस्य शारीरत्वकथनेन शरीरसम्बन्धि प्रत्यगात्मा इति पूर्वपक्षे कथितम्।

**अत्र श्रीभाष्यकाराः श्रीरामानुजाचार्याः –** सैषा आनन्दस्य मीमांसा भवति इत्यारभ्य यतो वाचो निवर्तन्ते अप्राप्य मनसा सह इत्येवमन्तं प्रोक्तस्य आनन्दस्य प्रत्यगात्मनस्यार्थान्तरभूतस्य परमात्मनस्यैव सम्भवतीति ऊचुः। द्वितीये विकारशब्दात् न इति चेत् , न,

प्राचुर्यात्[17] इत्यस्मिन् सूत्रे जीवस्य आनन्दविकारत्वं सम्भवति इति , तदपि न उपपद्यति ।

जीवस्य ज्ञानानन्दस्वरूपस्य केनचिदाकारेण मृदः इव घटाद्याकारेण परिणामः सकलश्रुतिस्मृति -न्यायविरुद्धः। संसारदशायां तु कर्णणा ज्ञानानन्दौ सङ्कुचितौ इति उपपादयिष्यते। अतश्चानन्दमयः जीवादन्यत् परंब्रह्म।

तृतीये तद्धेतु व्यपेशाच्च[18] इत्यस्मिन् सूत्रे को ह्येवान्यात्कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्, एष ह्येवानन्द याति इत्येष एव जीवानानन्दयतीति जीवानन्दहेतुः अयं व्यपदिश्यते। अतश्च आनन्दयितव्यात् जीवात् आनन्दयिता अयमन्यो आनन्दमयः परमात्मेति विज्ञायते ।

चतुर्थे मान्त्रवर्णिकमेव च गीयते[19] इत्यस्मिन् सूत्रे सत्यं ज्ञानमनन्तं ब्रह्म इति मन्त्रवर्णोदितम् ब्रह्म एव आनन्दमयः इति गीयते। तत्तु जीवस्वरूपादन्यत् परंब्रह्म । तथा हि– ब्रह्मविदाप्नोति परमिति जीवस्य प्राप्यतया ब्रह्म निर्दिष्टम्।

तदेषा अभ्युक्ता इति, तत् ब्रह्म अभिमुखीकृत्य प्रतिपाद्यतया परिगृह्य ऋगेषा अध्येतृभिः उक्ता। ब्रह्मणोक्तस्यार्थस्य वैशद्यमनेन मन्त्रेण क्रियत इत्यर्थः। जीवस्य उपासकस्य प्राप्यं ब्रह्म तस्माद्विलक्षणमेव।

अनन्तरञ्च तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यारभ्या उत्तरोत्तरैः ब्राह्मणैः मन्त्रैश्च तदेव विशदीक्रियते । अतः जीवादन्यः आनन्दमयः परमात्मा। पञ्चमे नेतरोऽनुपपत्तेः[20] इत्यस्मिन् सूत्रे शतगुणितोत्तरक्रमेण ब्रह्मानन्दस्यातिशय इयित्तां वक्तुमुद्यम्य तस्य इयत्तायाः अभावादेव वाङ्मनसयोः ततो निवृत्तिः – यतो वाचो निवर्तन्ते इत्युच्यते।

एवं इयत्तारहितं ब्रह्मणःआनन्दं विद्वान्, कुतश्चन न बिभेति इत्युच्यते। किञ्च अस्य मान्त्रवर्णिकस्य विपश्चितः सोऽकामयत बहुस्यां प्रजायेय इत्यारभ्य वक्ष्यमाण-स्वसंकल्पावङ्क्लुप्तजगज्जन्मस्थितिजगदन्तरात्मत्वादेः मुक्तात्मस्वरूपादन्यत्वं सुस्पष्ट-मेवेति भाष्यकाराः निरूपयामासुः।

षष्ठे भेदव्यपदेशाच्च इत्यस्मिन् सूत्रे तस्मामद्वा एतस्मादात्मनः आकाशः सम्भूत इत्यारभ्य मान्त्रवर्णिकं ब्रह्म व्यञ्जयद्वाक्यं अन्नप्राणमनोभ्यः इव जीवादपि तस्य भेदं व्यपदिशति।

तस्माद्वा एतस्मात् विज्ञानमयात् अन्योऽन्तर आत्माऽऽनन्दमयः इति। अतो जीवाद्भेदस्य व्यवपदेशाच्चायं मान्त्रवर्णिकः आनन्दमयोऽन्यःल एवेति ज्ञायते। सप्तमे कामाच्च नानुमानापेक्षा[21] (ब्र.सू.1.19) इत्यस्मिन् सूत्रे जीवस्याविद्यापरवश्य जगत्कारणत्वे ह्यवर्थनीया अनुमानिकप्रधानादि शब्धाभिधेयचिद्वस्तुसंसर्गपेक्षा । तथैव हि चतुरिमुखानंकारणत्वम्। इह च सोऽकामयता , बहुस्यां-प्रजायेये त्यत्संसर्गरहितस्य स्वकामादेव विचित्र चिदचिद्वस्तुनस्सृष्टिः इदं सर्वंसृजत यदिदं किं चेत्यां नायते। अऽतोस्यानन्दसयस्य जगसृजतोनानुमानिकाचिद्वस्तुसंसर्गापिक्षा प्रतीयते। ततश्च जीवादन्य अनन्दमयः।

अन्तिम अष्टमसूत्रे अस्मिन्नस्य च तद्योगंशास्ति[22] इत्यस्मिन् सूत्रे आनन्दमये। अस्य जीवस्य, तद्योगं– आनन्दयोगम्, शास्तीति शास्त्रम्।

रसो वै सः रसं ह्येवायं लब्द्ध्वाऽऽनन्दी भवतीति रसशब्धाभिधेयान्दमयलाभादयं जीवशब्दाभि लपनीय आनन्दीभवतीत्युच्यमाने यल्लाभाद्य आनन्दी भवति स स एवेत्यनुन्मत्तः को ब्रवीतीत्यर्थः। एवमानन्दमयः परब्रह्मेति निश्चितेसति यदेषाकाशानन्दः विज्ञानमानन्दंब्रह्मेत्यादिष्वानन्दशब्दे -नानन्दमया एवं परां मृश्यते।

यथा विज्ञानशब्देन ज्ञानमयः । अत एव आनन्दंब्रह्मणोविद्वाणिति व्यतिरेकनिर्देशः। अत एव च आनन्दमयमात्मानमुपसंक्रामतिति फलनिर्देशश्च ।

उत्तरे चानुवाके पूर्वाणुवाकोक्ताणामण्णमयादीनां अन्नांब्रह्मेतिव्यजानात्, प्राणब्रह्मेतिव्यजानात्, मनोब्रह्मेति व्यजानात्, विज्ञानं ब्रह्मेति व्यजानादिति प्रतिपादनात्। आनन्दोब्रह्मेत्यप्यानन्दमयस्यैव प्रतिपादनमिति वीज्ञायते। तता एव च तत्रापि आनन्दमयामात्मानमुपसंक्रमयेत्युपसंहृतम्। अतः प्रधानशब्दापिलप्यादर्थान्तिरभूतस्य परस्य ब्रह्मणो जीवशब्दाभिलपणीयादपि वस्तुनोऽ-र्थान्तिरत्वं सिद्धम्।

**सन्दर्भ**

1. सु.का.34 - 6
2. छा.उ.8.12.3
3. छा.3.8.12.6
4. अमरः 1.4.24
5. बृ.उ. - 4-5-13
6. आनन्दमयोSभ्यासात् - 1.1.6
7. स्तो - 2.11
8. तै.आ.3
9. श्वेताश्व -6-2
10. मुण्डक.1.1.9
11. मुण्डक - 1.1.19
12. तै . आ - 4
13. तै. आ - 5.1
14. बृ . उ - 4.4.14
15. प्रश्न . उ - 4.9
16. ब्र .सू - 4.4.1
17. ब्र .सु – 1.1.14
18. ब्र . सु – 1.1.5
19. ब्र.सु – 1.1.16
20. ब्र.सू.1.1.17
21. ब्र.सू.1.19
22. ब्र.सू.1.20